.. shrI shivAShTottara shatanAma stotram ..

# ॥ श्री शिवाष्टोत्तर शतनाम स्तोत्रम् ॥

शिवो महेश्वरश्शंभुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १॥
शंकरश्शूलपाणिश्च खट्वांगी विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकंठो भक्तवत्सलः ॥ २॥
भवश्शर्वस्त्रिलोकेशश्शितिकंठश्शिवप्रियः ।
उग्रः कपाली कामारी अंधकासुरसूदनः ॥ ३॥
गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४॥
कैलासवासी कवची कठोरस्त्रिपुरांतकः ।
वृषांको वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५॥
सामप्रियस्स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६॥
हविर्यज्ञमयस्सोमः पंचवक्त्रस्सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७॥
हिरण्यरेतः दुर्धर्षः गिरीशो गिरिशोनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८॥
कृत्तिवासः पुरातनर्भगवान् प्रमथाधिपः ।
मृत्युंजयस्सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥ ९॥
व्योमकेशो महासेनजनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्भुध्नो दिगंबरः ॥ १०॥
अष्टमूर्तिरनेकात्मा सात्त्विकश्शुद्धविग्रहः ।
शाश्वतः खंडपरशुरजः पाशविमोचकः ॥ ११॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
भगनेत्रभिदव्यक्तो दक्षाध्वरहरो हरः ॥ १२॥
पूषदंतभिदव्यग्रो सहस्राक्षस्सहस्रपात् ।
अपवर्गप्रदोऽनंतस्तारकः परमेश्वरः ॥ १३॥
इति श्री शिवाष्टोत्तरशतनामस्त्रोत्रम् समाप्तम् ॥

Please send corrections to sanskrit@cheerful.com
Last updated January 25, 2003